International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(3): 26-30
© 2022 IJSR
www.anantaajournal.com
Received: 05-02-2022
Accepted: 13-04-2022

**ओमप्रकाशपण्डा**
शोधच्छात्रः, केन्द्रीय.संस्कृत.
विश्वविद्यालयः
राजीवगान्धीपरिसरः शृङ्गेरी,
कर्णाटकम्, भारत

Corresponding Author:
**ओमप्रकाशपण्डा**
शोधच्छात्रः, केन्द्रीय.संस्कृत.
विश्वविद्यालयः
राजीवगान्धीपरिसरः शृङ्गेरी,
कर्णाटकम्, भारत

# महाकवेः कालिदासस्य महाकाव्यद्वये काव्यदोषाणां समीक्षणम्

## ओमप्रकाशपण्डा

### प्रस्तावना

लोकेऽस्मिन् सर्वोऽपि जनः गुणेभ्यः स्पृहयति, दोषेभ्यश्च दूर एव तिष्ठतीति सर्वेऽपि जानन्त्येव । 'गुणाः पूजास्थानम्' इति महाकवेः भवभूतेरुक्तिः । तेनैव गुणविरोधिनां दोषाणां निन्द्यत्वं स्वयं ज्ञायते । अत एव ये सद्गुणैर्भूषिताः भवन्ति तेषु सर्वेषामपि प्रीतिः स्वाभाविकतया जायते । किन्तु ते गुणाः यदि दोषैः संयुज्यन्ते तर्हि तेऽपि दोषा इव दूरीकर्तव्या एव । यतः तत्र गुणानामपेक्षया दोषा एव प्रबला भवन्ति । अत एवोच्यते-

दुर्जनः परिहर्तव्यः विद्यया भूषितोऽपि सन् ।
मणिनाऽलङ्कृतः सर्पः किमसौ न भयङ्करः ॥

इति । विषस्य एकेन बिन्दुना संयुक्तं भोजनं विषमयमेव भवति । एतादृशलोकस्य प्रतिबिम्बभूते काव्येऽपि एष विचारः यथावत् स्वीकृतो दृश्यते । काव्यात्मनः रसस्य अभिव्यञ्जका माधुर्यादयो गुणाः कविभिः सहृदयैश्च समाद्रियन्ते । किन्तु रसापकर्षलक्षणाः दोषाः सर्वैरपि हेयत्वेन परिगण्यन्ते । काव्यप्रयोजनमौलिभूतः रसास्वाद-समुद्भूतः विगलितवेद्यान्तरानन्दः न लभ्यते काव्येभ्यः तत्रस्थानां दोषाणां कारणात् । अतः दोषैः काव्यस्य परमप्रयोजनमेव विहन्यते इति तु निश्चितम् ।
किन्तु काव्यजगति कविकुलगुरुरिति कविषु मूर्धन्यस्थानमलङ्कृतवतः महाकवेः कालिदासस्य काव्येषु दोषाः न सन्ति किम् ? इति पृष्टे सति सन्तीति वक्तुमपि न शक्नुमः, न सन्तीत्यपि वक्तुं न शक्नुमः । यतः तस्य काव्येभ्योऽपि दोषा उद्घाट्य दर्शिताः आलङ्कारिकैः । किन्तु तस्य काव्येभ्यः रसास्वादमव्याहततया कृतवद्भिः, रसास्वादजनितपरमानन्दमनुभूतवद्भिः सहृदयैः तस्य कृते कविकुलस्य गुरुस्थानं प्रदत्तमस्ति । तर्हि कः पक्षः साधु ? एतय निर्णयार्थं काव्यदोषाणां सामान्यस्वरूपमस्माभिः परिशीलनीयं भवति ।

**काव्यदोषस्वरूपम्**

काव्ये आत्मस्थानीयः रसः सर्वाण्यपि काव्यतत्त्वानि गुणालङ्कारवक्रोक्त्यादीनि आत्मन एव परिपोषाय साधनीकरोति । अत एव रससम्बन्धेनैव तानि तत्त्वानि तत्त्वमवाप्नुवन्ति, नान्यथा । अर्थात् रसाभिव्यञ्जकत्वात् गुणानां गुणत्वम्, काव्यशोभाधायकत्वात् अलङ्काराणामलङ्कारत्वम् इत्यादि । तथैव रसास्वादे पाषाणायमाना दोषा अपि रसविघातकत्वेनैव दोषत्वं प्राप्नुवन्ति, नान्यथा । 'मुख्यार्थहतिर्दोषः रसश्च मुख्यः' इति तत्स्वरूपं मम्मटाचार्येण स्पष्टमुक्तम् । यदि ते सन्तोऽपि न प्रकाशन्ते, सहृदयहृदये पदं न विदधति, रसं न विघातयन्ति तर्हि तेषां दोषत्वं नैवास्तीत्येव सकलालङ्कारिकाणामेकोऽभिप्रायः । अतः श्रुदिदुष्ट-अक्रमादि'दोषविशेषलक्षण'-समन्वयेऽपि 'रसविघातकत्व'रूप'दोषसामान्यलक्षण'स्य समन्वयाभावे निर्दोषतैव इति निर्णयः ।

कवयः यद्यपि अन्तर्दृष्ट्या विशिष्टप्रतिभया च अलौकिकपदमारूढा लोके, तथापि तेऽपि मानवकोटौ वर्तन्त इति सहजा एव दोषास्तन्निर्मितकाव्येषु । किन्तु केषाञ्चन कवीनां काव्येषु ते रसं विघातयन्ति, केषाञ्चन काव्येषु न । काव्येषु कुत्र दोषाः रसविघातका भवन्तीति आनन्दवर्धनाचार्यः सूक्ष्मतया एवं प्रतिपादयति-

अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः ।
यस्त्वशक्तिकृतो दोषः स झटित्येवावभासते ॥[1]

इति। अत्र व्युत्पत्तिपदेन अभ्यासोऽपि गृह्यते । काव्यकारणीभूतांशाः प्रतिभा-व्युत्पत्ति-अभ्यासाः। तेषु व्युत्पत्त्या अभ्यासस्य च कारणात् जायमानो दोषः प्रतिभया संव्रियते । किन्तु प्रतिभाया न्यूनतया जायमानान् दोषान् संवरीतुं न व्युत्पत्त्यभ्यासौ पारयतः । अत एव यः कविः अप्रतिम-प्रतिभावान् भवति, तस्य काव्येषु अव्युत्पत्ति-अनभ्यासाभ्यां जाता दोषाः तस्य प्रतिभावशात्, उद्गच्छति रसप्रवाहे तिरोधानं प्राप्य, काव्यरसस्य आस्वादः निरन्तरायो यथा स्यात्तथा कृत्वा, स्वेषां रसविघातजं कलङ्कं मार्जयन्ति । तदा तत्काव्यीयशब्दार्थौ निर्दुष्टावित्येव परिगण्येते । काव्यशब्दार्थयोः एतादृशनिर्दुष्टत्वमेव मम्मटाचार्योक्तकाव्यलक्षणस्थस्य 'अदौषौ' पदस्य पर्यवसितार्थः ।

**कालिदासस्य काव्येषु दोषाः**

बहव आलङ्कारिकाः कालिदासस्य काव्येभ्यः दोषाणामुदाहरणं स्वीचक्रुः । तेषाम् अवलोकनेन अनेकेषां पद्यानाम् अदोषतैव दृश्यते । केषुचित् पद्येषु दोषो वर्तत एव । तेन विरचितयोः द्वयोः महाकाव्ययोः आधारेण तदिदानीं विमृश्यते । कुमारसम्भवमहाकाव्यस्य पञ्चमसर्गे ब्रह्मचारिवेषेणागतस्य शिवस्य मुखात् परमेश्वरस्य वरत्वमेव निराक्रियत एवम्-

वपुर्विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु।
वरेषु यद्बालमृगाक्षि मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने ॥[2]

इति । एतत्तु लोकप्रमाणेनापि सिद्धमेव । यतो हि,

कन्या वरयते रूपं माता वित्तं पिता श्रुतम् ।
बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः ॥[3]

इत्युक्तमस्ति । एतदनुसारं कन्यया दृश्यमानं रूपं नास्तीत्येतत् 'वपुर्विरूपाक्षम्' इत्यनेन, मात्रा परिगण्यमानं वित्तं नास्तीत्येतत् 'दिगम्बरत्वेन निवेदितं वसु' इत्यनेन, बान्धवैरभीष्टं कुलं नास्तीति 'अलक्ष्यजन्मता' इत्यनेन च न केवलं विनान्तरायं स्पष्टं ज्ञायते सहृदयैः, अपि तु आस्वाद्यते। किन्त्वत्र 'अलक्ष्यजन्मता' इत्यत्र आस्वादविघातकः कश्चन दोषः मम्मटाचार्यैरुद्घाटितः । सच दोषः विधेयपदस्य प्राधान्येनानिर्देशरूपोऽ विमृष्टविधेयांशः । उद्देश्यविधेययोर्मध्ये विधेयं प्रधानम् उद्देश्यं चाप्रधानम् । अतः विधेयपदं कुत्रापि समासगतत्वादिना अप्रधानतया न निर्देश्यम् । अस्मिन् पद्ये वपुष उपरि यद्विरूपाक्षत्वं विधीयते तत्तु सम्यगेव निर्दिष्टम् । तत्र कोऽपि दोषो नास्ति । किन्तु 'अलक्ष्यजन्मता' इत्यत्र जन्म उद्देश्यम्, तस्य उपरि अलक्ष्यत्वं विधीयते इति अलक्ष्यमित्येतत् विधेयपदम् । अत्र बहुव्रीहिसमासे तद्धितार्थगुणीभूतेऽन्यपदार्थे विधेयपदस्य गुणीभावः सञ्जातः-'अलक्ष्यं जन्म यस्य तस्य भावः तत्ता' इति । अतः 'अलक्षिता जनिः' इति प्रयोगः करणीय इति मम्मटाचार्यस्याभिप्रायः ।

यद्यपि स दोषस्तत्र वर्तत इति तु सत्यमेव, तथापि यदि वयम् अस्य पद्यस्य सन्दर्भं सूक्ष्मेक्षिकया अवलोकयामः, तदा कवेः विवक्षितस्य प्रतिपादनम् 'अलक्ष्यजन्मता' इत्यनेनैव भवति, न तु 'अलक्षिता जनिः' इत्यनेनेति न केवलं स्पष्टं ज्ञायत एव किन्तु आश्चर्यमप्यनुभूयते । यतः 'अलक्षिता जनिः' इत्यनेन शब्दगतः स दोषः निवर्तते, किन्तु कवेरभिप्रेतं न निर्वर्त्यते । परमेश्वरस्य विषये जुगुप्साभावजननं कवेरभिप्रेतम् । किन्तु 'अलक्षिता जनिः' इत्यनेन तस्य जन्मवृत्तान्तः न ज्ञायत इत्येव प्रतीयते, न तु जुगुप्साजनकत्वं तस्य दृश्यते । वपुर्विरूपाक्षमित्येतत् प्रत्यक्षमिति दर्शनसमनन्तरमेव जुपुप्साजनने समर्थः सः प्रयोगः । किन्तु जनिः न प्रत्यक्षा । परमेश्वरे तस्याः जुगुप्साजनकत्वं तदा एव शक्यते यदा तस्याः भावः (जन्मता) तस्मिन् धर्मरूपेण निविष्टा भवति । अतः अलक्ष्यजन्मतारूपधर्मः तस्य वर्तते इत्येतदेव कवेरभिप्रायनिर्वर्तने क्षममिति दोषोऽप्यत्र गुणायते। अपि चात्र सहृदयस्यास्वादप्रक्रियायां विधेयांशस्य समासगतत्वं नावरोधकारि । तेन रसविघातकत्वरूपदोषलक्षणस्यात्र अनन्वयात् न तस्य दोषत्वमिति उभयथापि अत्र दोषाभावः समर्थयितुं शक्यः।

द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः ।
कला च सा कान्तिमती कलावतः त्वमस्य लोकस्य च नेत्रकौमुदी ॥[4]

इतीदं पद्यम् 'अक्रम (अविद्यमानक्रम)' दोषस्योदाहरणत्वेन दत्तं मम्मटाचार्येण । यस्य यदव्यवहितपूर्वत्वेन यदव्यवहितपरत्वेन विवक्षितार्थानुभावकत्वं तस्य तत्परिहारेण अन्यत्र स्थितत्वम् अक्रमत्वम् । अस्मिन् पद्ये 'त्वं'पदार्थस्यैव शोच्यतायां समुच्चयस्य द्योतनीयत्वात् लोकपदार्थे समुच्चयाभावात् 'त्वं' शब्दानन्तरं चकारो युक्त इति तस्याभिप्रायः । अस्य दोषस्य लक्षणमत्रान्वेतीति अक्रमदोषोऽस्त्येव । तथैव,

ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम् ।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ॥[5]

इतीदं पद्यं मम्मट-विश्वनाथाभ्यामुभाभ्यामपि सर्वनाम्नः भग्नप्रक्रमत्वस्योदाहरणत्वेन दत्तमस्ति । पद्यस्यास्य उत्तरार्धे इदमा प्रक्रान्तस्य तच्छब्देन परामर्शः कृतः । स च तत्समानाभ्याम् एतत्-अदस् शब्दाभ्यां करणीय आसीदिति अत्र दोषो दर्शितः । स दोषोऽत्र वर्तते ।

दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम्।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसामतीव॥[6]

इतीदं पद्यम् अनुचितार्थदोषस्योदाहरणत्वेन दत्तम् । उत्प्रेक्षायाम् उत्प्रेक्षितार्थसमर्थने अर्थस्य अनुचितत्वं न सम्भवतीत्येतद्विरुद्ध्य तत्रापि तद् भवेदेवेत्येतत्समर्थयितुं विश्वनाथेन इदमुदाहरणं दत्तम् । हिमालयवर्णनपरमिदं पद्यम् । सम्भावनाविषयीभूतं वस्तु सद्वस्तु एव भवेत् । तादृशे सद्वस्तुनि अवर्तमानस्य प्रकाशनं सम्भावनम् । यथा 'मुखं चन्द्रं मन्ये' इत्यत्र सम्भावनाविषयं मुखम् (सद्वस्तु), तत्रावर्तमानं चन्द्रत्वं सम्भाव्यते, तथा । अचेतनस्यान्धकारस्य असत्त्वात्, अत एव भीतेः असम्भवात् सम्भावना अनुचितैव । अतः अत्र स दोषो वर्तत इति विश्वनाथ-स्याभिप्रायः । अलङ्कारस्य परिप्रेक्ष्ये तदभिप्रायः समीचीन एव । तथापि सन्दर्भस्यौचित्यमिति किञ्चिद्भवति । तदनुसारं महाकाव्ये सन्दर्भावलोकनेन अत्र अनौचित्यं नास्तीति निश्चप्रचं वक्तुं शक्यते । यतः अत्र महात्मनां शरणागतरक्षणपरत्वप्रकाशनं तन्मूलकं हिमालयस्य महात्मताख्यापनं कविना विवक्षितम् । मर्यादापुरुषोत्तमः श्रीरामचन्द्रः शरणागतं शत्रुपक्षीयं विभीषणं प्रत्यभयं ददत् शरणागतवात्सल्यमेवं प्रकटीकृतवान्-

सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥[7]

इति । श्रीरामः यथा विभीषणः शत्रुपक्षीय इति न गणितवान्, तथा महात्मानः शरणागतानां क्षुद्रत्वं न गणयन्ति । 'वसुधैव कुटुम्बकम्' इतीव शरणागतानां पूर्वापरमविचार्य ममत्वभावनया तान् स्वीकुर्वन्ति इति अन्धकारे ममत्वभावनाप्रदर्शकस्य हिमालयस्य महात्मतायाः वर्णनं कवेर्विवक्षा । सहृदया एतद्गृहीतुं शक्नुवन्ति । तेषां मनः कविविवक्षामेवानुसरति । अत एव अभिनवगुप्ताचार्यैः
'येषां काव्यानुशीलनवशात् विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता, ते हृदयसंवादभाजः

सहृदयाः'[8] इति सहृदयस्वरूपं प्रतिपादितम् । कवेः अस्यां विवक्षायां सहृदयानां तन्मयीभवनं भवत्येव । महात्मनां 'सकलेष्वपि ममत्वभावना' अवश्यमेव भावना(चर्वणा)विषया भवति। तेन अत्रापि दोषसामान्यलक्षणस्य समन्वयाभावः अदोषत्वं समर्थयति। रघुवंशस्य ताटकावधवर्णनप्रसङ्गे कालिदासेन निबद्धम्,

रामम‍न्मथशरेण ताडिता दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ॥[9]

अस्मिन् पद्ये अमतपरार्थदोष उक्तः मम्मटाचार्येण । यदा कवेः विवक्षितं रसं विहाय अविवक्षिते रसे शब्दार्थः गच्छति तदाऽयं दोषः पदं करोति । बीभत्सोऽत्र अभिमतरसः । तेन सह श्लेषालङ्कारमाध्यमेन अत्र अभिसारिकावृत्तान्तोऽपि प्रतीयते । नवरसानां मध्ये सर्वे रसाः सर्वै रसैः न युज्यन्ते । तत्र शान्त-शृङ्गारयोः, शृङ्गार-बीभत्सयोः, करुण-भयानकयोः, शान्त-भयानकयोः, हास्य-रौद्रयोः-इत्यादिरसानां विरोधः आलङ्कारिकैः प्रतिपादितः । अत्र बीभत्सेऽभिमते तस्य आस्वादे प्रतीयमानः शृङ्गारः विरोधं जनयति । अतः स दोष इति मम्मटाचार्यस्याभिप्रायः ।

अत्र तु महाकविकृतदोषः स्पष्टं प्रतीयते । यतः शूर्पणखायाः यथा रामे कामभावना आसीत्तथा ताटकायाः मनसि नैवासीत् । अतः अत्र शृङ्गारपरकार्थव्यञ्जकशब्दाः मन्मथ-जीवितेशादयः न प्रयोक्तव्या आसन् । साहित्यदर्पणकारः कविराजविश्वनाथोऽपि कालिदासविरचित 'रघुवंश' महाकाव्यस्य,

सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम् ।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥[10]

अत्र विश्वनाथेन विधेयपदस्य समासगतत्वादप्राधान्यरूपोऽविमृष्टविधेयांशदोषः दर्शितः । 'आसमुद्रक्षितीशानाम्' इत्यत्र क्षितीशत्वमुद्दिश्य आसमुद्रत्वं विधीयते । 'रघुवंशीयानामधिकारः समुद्रेऽप्यासीदि'त्यत्र कवेः विवक्षा वर्तत इति तस्याभिप्रायः । तादृशी विवक्षा समासरहितत्वेन 'आसमुद्रं क्षितीशानाम्' इति प्रयोगेण निर्वर्त्यते, न तु समासगतत्वेन । समासगतत्वे समुद्रपर्यन्ता या क्षितिस्तस्याः ईशा इति क्षितिमात्रस्यैव ईशत्वं बोध्यते । अत विवक्षितस्य हानिः । अतः समुद्रेष्वपि तेषामधिकार आसीत् इति अधिकारत्वान्वये प्रधानीभूतसमुद्रस्यापि विधेयस्य समासे गुणीभावात् विधेयाविमर्शः इति ।

किन्त्वत्र कवेर्विवक्षितं तादृशप्रयोगादपि सिद्ध्यतीति वक्तुं शक्यम् । यतः राजा, पार्थिवेत्यादिपदानि विहाय 'क्षितीश'पदं तेन प्रयुक्तमस्ति, यत्र पृथ्वीवाचकः 'क्षिति'शब्द उपस्थितः । समुद्रपर्यन्तायाः क्षितेः ईशानां समुद्रेऽप्यधिकारो भवत्येव । यतः 'कस्यां दिशि वर्तमानः समुद्रः तस्य राज्यस्य सीमा आसीदि'ति दिशो निर्देशः न कृतः कविना । समुद्रपर्यन्ता भूमिरित्येवोक्तम् । अतः सर्वविधेनापि समुद्रमप्यविहायैव सर्वा भूमिः तेषामेवाधिकारे वर्तत इति ज्ञायत एव । तेषां च चक्रवर्तिपदे विराजमानत्वात् समुद्रे तेषामधिकारमतिरिच्य अन्यस्य कस्याप्यधिकारः न युज्यते । अतः न तथाप्रयोगेण कविविवक्षितत्वहानिः ।

कविकुलगुरोः कालिदासस्य कस्मिन् काव्ये रसास्वादः नास्ति? 'शृङ्गारी चेत् कविः काव्ये जातं रसमयं जगत्' इत्यस्योक्तेः मूर्तरूपमिव महाकविः कालिदासः विराजते काव्यलोके । किन्तु आश्चर्यमिदं यत् तस्य काव्येभ्योऽपि आलङ्कारिकैः मम्मटविश्वनाथादिभिः काव्यदोषाः दृष्टा इति । काव्यदोषाणां रसविघातकत्वं, कालिदासस्य रसकवित्वम्, तस्य काव्येषु दोषाणामस्तित्वम्-इत्येते त्रयः अंशाः परस्परं वैरुद्ध्यं प्रकटयन्तीति तु निश्चितमेव । यतः कालिदासस्य काव्येषु दोषाः सन्ति चेत् तत्र रसविघातः अवश्यं भवेत् । यदि दोषैः दूषितं भवति काव्यं तर्हि तत्कर्तुः कविकुलगुरुरिति काव्यलोकस्य मुकुटप्रायं स्थानं कथं लभ्यते ? तत्तु कालिदासेन लब्धमेवेति तस्य काव्येषु दोषाः न सन्तीत्येव वक्तव्यं भवति । 'एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेश्विवाङ्कः' इत्युक्तदिशा कालिदासस्य काव्येषु रसप्रवाहे तत्रस्था दोषाः प्रवाहान्तर्गतावकरिका इव अकिञ्चित्करा एव । दोषाणां विशेषलक्षणे अन्वितेऽपि 'रसविघातकत्व' रूपसामान्यलक्षणस्य समन्वयाभावः तस्य काव्यानां वैशिष्ट्यं वर्तते । तदेव च तस्य काव्यस्य निर्दुष्टत्वस्य मूलं भवति । एवं बाह्यरूपेण महाकवेः प्रयोगः कदाचित् दुष्ट इव भासेत । किन्तु आन्तरिकदृष्ट्या अवलोकिते सति तत्र कवेः नवनवोन्मेषशालिन्याः प्रज्ञायाः विलासो दृश्यते ।

कवयः दोषज्ञा अपि भवन्ति। कश्चन विषयः सकारात्मकतयैवोच्यते चेत् अपूर्णं भवति। नकारात्मकतयापि तत्तु स्पष्टीकरणीयं भवति । नकारात्मकरूपेणोक्तं वचनं सकारात्मकम् इतोऽ-प्यधिकतया स्पष्टीकरोति । अत एव 'रामादिवद्वर्तितव्यमि'त्यनेन वचनेन सह 'रावणादिवन्न वर्तितव्यमि'त्यप्युच्यते । एतद्दृष्ट्या कवीनामपि केवलं रसगुणालङ्कारादीनां ज्ञानेन नालम्, अपि तु परिहर्तव्यदोषाणामपि ज्ञानमावश्यकमेव । किन्तु दोषाणामकिञ्चित्करत्वविधाने न सर्वे पटवः । कालिदासस्तत्र विशिष्यते। सः स्वकाव्येषु कवित्वेन सह स्वस्य दोषज्ञत्वमपि प्राचीकटत् । कुवलयानन्दे श्रीमदप्प्यदीक्षितैः दत्ते,

गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेडाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥[11]

इत्यस्मिन् पद्ये विदुषां गुण-दोषोभयग्रहणं, तयोः यथायोग्यनिर्वहणं च प्रतिपादितमस्ति । शिवः गुणप्रतिनिधिं चन्द्रमसं शिरसि संस्थाप्य गुणानां समादरं, दोषप्रतिनिधिं विषं कण्ठे नियम्य तस्य नीचं स्थानं चादर्शयत् । तथैव बुधाः गुणदोषौ द्वावपि जानन्ति, तयोः यथायोग्यं स्थानमपि जानीयुरेव । तथैव शिवे स्थिरभक्तियोगयुक्तः कालिदासोऽपि काव्येषु दोषाणामवस्थितिः कीदृशी भवतीति स्वकाव्येषु दिग्दर्शितवान् । मम्मटाचार्योक्तस्य 'अदोषौ शब्दार्थौ' इत्यस्य जीवदुदाहरणानि भवन्ति कालिदासमहाकवेः काव्यानि इति शम् ।

**सन्दर्भग्रन्थसूची**


1. ध्वन्यालोकः, तृतीयोद्योतः, Motilal Banarasidas Publication, 2nd Revised Edition, 1981, 67. (तृतीय-चतुर्थ उद्योतौ)
2. कुमारसम्भवम्, पञ्चमसर्गः, श्लोक-७२
3. सुभाषितम्
4. कुमारसम्भवम्-५ / ७१
5. कुमारसम्भवम्-६/९४
6. कुमारसम्भवम्-१/१२
7. रामायणम्
8. ध्वन्यालोकलोचनम्-प्रथमोद्योतस्य व्याख्याने ।
9. रघुवंशम्-११/२०
10. रघुवंशम्-१/३
11. कुवलयानन्दः, उपमाप्रकरणम्